योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ११५

अज्ञातलेखकः

पञ्चदशाधिकशततमः सर्गः ११५

पार्श्वगा ऊचुः ।

अत्रोत्तमाशथ लतावलयालयेषु

लीलाविलोलललनाः कलयन्ति गीतम् ।

उद्दामभावरसविस्मृतवासरेहा

विश्रम्य किंनरगणाः कलकाकलीकम् ।। १

एते हिमाद्रिमलयाचलविन्ध्यसह्य-

क्रौञ्चा महेन्द्रमधुमन्दरदर्दुराद्याः ।

दूरस्थिता दृशि सिताभ्रपटा वहन्ति

संशुष्कपर्णलवलाञ्छितलोष्टलीलाम् ।। २

अमी दूरालोकव्यवहितमहावर्त्मनिचयाः

पुरःप्राकाराणां कुलशिखरिणो बिभ्रति वपुः ।

विशन्तीरम्भोधिं कलय लुलिता भान्ति सरितः

पटस्यान्तः सक्ताः प्रतनुसितसूत्रा इव दशाः ।। ३

दशाशाः शैलानामुपरि परितः प्रावृतघना

घनश्यामाकाराः खगकलकलालापलपिताः ।

लतामुक्तैः पुष्पैर्ललितवनलेखाभुजलता

हसन्त्यस्ते राजन्भवनवनिता भान्ति पुरतः ।। ४

तालीतमालबकुलाकुलतुङ्गशृङ्ग-

मेकीकृताकृति वनं तरलं विभाति ।
अभ्याहतं जलनिधेस्तरलैस्तरङ्गै-
स्तीरान्तलग्नघनशैवलजालकल्पम् ।। ५
इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितोऽपि शरणार्थिनः शिखरिपत्रिणः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ।। ६
एते जम्बुनदीतटा रविकरैराभान्ति हेमाखिल-
ग्रामारण्यपुरस्थलीगिरितरुस्थाण्वग्रहारोच्चयाः ।
ज्वालालीवलिताबरांतरलिहो मुञ्चन्ति भासोभित-
स्सर्वा भूमिप भूरिहैवममरासेव्यास्ति नो मानुषैः ।। ७
एते कदम्बवनकम्बलमम्बुदाभ-
माभान्ति भास्करपथानुगता वहन्तः ।
अस्याचलस्य वसुधेव तटं तवास्तु
मा सूर्यरोधकनभस्थघनौघशङ्का ।। ८
एषोऽसौ मलयो लयोग्रलवलीवल्लीलसच्चन्दन-
स्फीतामोदमदाद्रसेन तरवो वक्रे क्रियन्ते त्रिभिः ।
सज्वालोदहनाक्षसंस्थितकपोलोष्मोदयोत्ताण्डवे
अङ्गुष्ठाङ्गुलिभिर्यथोष्णककणास्तप्ता यथा योषिताम्
एषोऽब्धिधौतकलधौततटाधिरूढ-
भोगीन्द्रभोगपरिवेष्टितचन्दनोऽगः ।
विद्याधरीवदनपङ्कजदीप्तिपुञ्ज-
हेमीकृताखिलशिलो मलयाभिधानः ।। १०
कूजत्कुञ्जकठोरगह्वरनदीक्वत्कारवत्कीचक-
स्तम्भाडम्बरमूकमौकुलिकुलः क्रौञ्चाचलोयं गिरिः ।
एतस्मिन्प्रबलाकिनां प्रचलतामुद्वेजिताः कूजितै-

रुद्वेल्लन्ति पुराणरोहणतरुस्तम्भेषु कुम्भीनसाः ।।११

कोमलकनकलतालय-

विलसितललनाविलोलवलयकृतम् ।

श्रवणरसायनपानं

विततमिहाकर्णयास्य तटे ।। १२

करिकरटगलितमदजल-

वलितश्चलवीचिचञ्चरीकचयैः ।

चर्वित एष कदर्थित

इव कणनिकरो विरौति वारिनिधौ ।। १३

पश्यामलेन्दुरामृत-

नवनीतशरीरसुन्दरीवलितः ।

पितुरुत्सङ्गे कुरुते

जललीलां क्षीरवारिनिधौ ।। १४

नृत्यन्ति मत्तकलकोकिलकाकलीकाः

पश्यामले मलयसानुनि बालवल्ल्यः ।

लोलालिजालनयनारुणपत्रपाणि-

पुष्पा मधूत्सवविलासविशेषवत्यः ।। १५

वंशानां हृदि पर्वतेषु जलधौ तोयार्थिनीनां तु ये

शुक्तीनां हृदये विशन्ति समये वर्षांभसां बिन्दवः ।

ते मुक्ताफलतां व्रजन्ति करिणां कुम्भेषु वान्यद्भवेत्

शुद्धौ मौक्तिकवत्स्युरुत्तमगुणा एतास्त्रिधा जा-

तयः ।। १६

शैलेऽब्धौ पुरुषेऽवनौ जलधरे भेके शिलायां गजे

नानाकारधरा भवन्ति मणयः कर्माणि तेषां विभो ।

ह्लादोच्चाटनमारणज्वरभयभ्रान्तिप्रकाशान्धता-

खेदोत्तापनभूनभोगतिदृशो नाशो विधानं तथा।।१७

वातायनोदरगवाक्षकवाटकक्षा-

द्वाराननैरिह पुराण्युदिते पठन्ति ।

श्वभ्राभ्रकन्दरदरीवनवेणुरन्ध्र-

वर्गेण मन्दर इवामृतसिन्धुमिन्दुम् ।। १८

एतच्छृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-

र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।

प्रालेयाद्रेः प्रतितटवनं प्रोत्पतत्यभ्रमूर्ध्वं

वज्रस्तम्भो गगनसुतलोत्तोलनायेव भूमेः ।। १९

गङ्गातरङ्गहिमसीकरशीतलानि

विद्याधराध्युषितचारुशिलातलानि ।

पुष्पाभ्रसंवलितपुष्पितकाननानि

राजन्विलोकय महेन्द्रगिरेस्तटानि ।। २०

देशान्तरेषु विततानि वनान्तराणि

पुष्पस्थलान्युपवनान्यथ पत्तनानि ।

तीर्थेषु पूतभुवनानि जलानि दृष्ट्वा

दौर्भाग्यमीतिरपयाति जवानुविद्धा ।। २१

शृङ्गाणि पूरितदिगन्तरमण्डलानि

श्वभ्राभ्रकन्दरनिकुञ्जकुलाकुलानि ।

व्योमोपमान्यपि च वारिधिकुण्डलानि

दृष्ट्वा गलन्ति कुकृतानि बृहत्तराणि ।। २२

रम्याश्चन्दनवीथयो हि मलये विन्ध्ये मदान्धा गजाः

कैलासे नृप पादजाति कनकं चन्द्रं महेन्द्राचले ।

दिव्याश्चौषधयस्तुषारशिखरे सर्वत्र रत्नानि वै

सन्त्यन्धाखुवदेष जीर्णसदने व्यर्थं जनो जीर्यते ।। २३

सोन्नतं जगदिवोरुतटाकं

वारिणा विवलितं तिमिरेण ।

प्रस्फुरन्ति च युगान्त इवैता

विद्युतः शफरिका इव लोलाः ।। २४

सावश्यायाश्याननीहारधारा

धारोद्गारान्वारिदान्मादयन्तः ।

शीतानीतोद्दामरोमाञ्चचर्चाः

प्रोद्यच्छब्दं वान्त्यहो वर्षवाताः ।। २५

हा वाति नीलजलदप्रसरानुसारी

वातः किरन्विटपिपल्लवपुष्पगुच्छान् ।

धीरोत्करद्रुमवनान्तरचारचारु-

रासारसीकरकदम्बकसारसारः ।। २६

मारुताः सुरतक्रान्तकान्तानिःश्वसितैरिमे ।

वहन्ति वृद्धिं गन्धं च लवं स्वर्गादिव च्युताः ।। २७

कुवलयकुवलयविकचन-

कुसुमलताविदलनोद्यता मृदवः ।

घनपटपाटनपटवो

विधुतोपवना वहन्त्यमी पवनाः ।। २८

संध्याभ्रलेशानुपयन्ति वाता

नभस्तले कोमलकम्पनेन ।

नृपाङ्गणे पुष्पविचित्रलेखा-

नुवासिते भृत्यवरा इवैते ।। २९

क्वचित्कुसुमगन्धयः कमलवर्गगन्धाः क्वचि-

त्क्वचितकुसुमवर्षिणो ललितकेसरासारिणः ।

क्वचिच्च हिमपाण्डवो हरितपीतलश्यामला

वहन्ति शिखरानिलाः सुरतमन्दघर्मच्छिदः ।। ३०

क्वचिद्हुंकारकांकारैरङ्गारनिकरान्करैः ।

किंकरैर्विकिरत्यर्को मूर्खसंसर्गवानिव ।। ३१

नररसायनतृप्तिविमुक्तया

प्रमदया मदयापितलज्जया ।

उपगते वपुषा न विषह्यते

विषविमूर्च्छनयेव समायता ।। ३२

वलितताामरसा मृदुशीकराः

शशिकरोत्करवीचिविभेदिनः ।

सदहना इव तापमयाः पुरो

विरहिणीषु वनावनिवायवः ।। ३३

इह हि पूर्वपयोधितटावटे

विकटपत्रपटाः कटकीतटाः ।

नवमदासवयौवनसंश्रयाः

कलय यान्ति कथं शबरस्त्रियः ।। ३४

नवरसासवसारनिशागम-

क्षयभयातुरचित्ततयाङ्गना ।

त्यजति कान्तमियं न मनागपि

द्रुतमितो वलितेव पुरोऽहिभिः ।। ३५

प्रभाततूर्यमुखरैर्दिवसैरिव तर्जिता ।

हृद्येव स्फुटिता नारी निलीना दयितोरसि ।। ३६

प्रोत्फुल्लकिंशुकैषा

दक्षिणजलधेस्तटेऽत्र वनराजी ।

ज्वलितेव जलतरङ्गैः

पौनःपुन्येन सिच्यतेऽम्बुधिना ।। ३७

वास्या निर्यान्त्यनिलै-

र्धूमा इव कृष्णकेसराम्बुधराः ।

अङ्गारा इव कुसुमा-

न्युपशान्ताङ्गारवच्च खगभृङ्गाः ।। ३८

ईदृश्येव विलोकय

वनराजी सत्यवह्निना ज्वलिता ।

गिरिशिरसि तूत्तरस्यां

दिशि दूरे धूयते च खे पवनैः ।। ३९

क्रौञ्चाचलस्य भुवि मन्थरमेघचक्र-

गम्भीरताररवनर्तितबर्हिणीयम् ।

पश्योत्थितं तुमुलमाकुलवर्षवात-

व्याधूतपुष्पफलपल्लवकाननीयम् ।। ४०

अस्ताचले विकटकाञ्चनकूटकोटि-

संघट्टनस्फुटितजर्जरचारुसंधिः ।

खर्वं रथः पतति स स्म रवेः सचक्र-

चीत्कारताररतरकूबररास एषः ।। ४१

भुवनभवनप्राकारेऽद्रौ निशाकरमेरुकं

परिविकसितं मीतं भासा मलालिरुपाश्रितः ।

तदिह जगतां वस्तु श्रेष्ठं न किंचन विद्यते

विधिरुपहतः कुर्यान्नो यत्क्षणेन कलङ्कितम् ।। ४२

त्रिभुवनहराट्टहासो

भुवनमहाभवन एष मङ्कोलः ।

क्षीरसलिलावपूरो

गगनाब्धेश्चान्द्र आलोकः ।। ४३

स्पृष्टप्रदोषमयमन्दरमथ्यमान-

चन्द्रार्णवोल्लसितदुग्धतरङ्गभङ्गैः ।

पश्य प्रभापटलकैः परिपूरिताङ्गीः

पूरैरिवोग्रसरितः प्रसरद्भिराशाः ।। ४४

एते पतन्त्यतुल तालकराललोल-

वेतालवालवलिता निशि गुह्यकौघाः ।

हूणेश्वरस्य नगराणि निरस्तशान्ति
स्वस्तिश्रवादिविकलानि बलेन भोक्तुम्।। ४५
तावद्विभाति गगने परिपूर्णचन्द्रो
यावद्वधूवदनमेति न सद्म बाह्यम् ।
अभ्युद्गतेऽङ्गणनभस्यबलाननेन्दा-
विन्दोः सिताभ्रशकलस्य च को विशेषः ।। ४६
वृद्धानि चन्द्रांशुनवाम्बराणि
गङ्गौघनिर्धूतशिलान्यमूनि ।
हिमाततान्युग्रलताजटानि
तुषारशैलेश्वरमस्तकानि ।। ४७
स एष मन्दारवनावतंसो
दोलाप्सरोगेयविसारिवातः ।
क्वचिन्मणिद्योतविचित्रचित्रः
संदृश्यते व्योमनि मन्दराद्रिः ।। ४८
प्रोन्निद्रनीरन्ध्रशिलीन्ध्रसान्द्र-
पुष्पार्घ्यपात्रध्रमहामहीध्राः ।
सान्द्राभ्रनिर्ह्रादगभीरकुक्षौ
सर्क्षान्तरिक्षश्रियमुद्वहन्ति ।। ४९
इतः स कैलासगिरिर्गरीयसा
प्रभाप्रवाहेण मितेन यस्य खम् ।
शंभोरिवाभाति सुतस्य कुट्टिमं
चन्द्रोऽपि च क्षीरसमुद्रगो यथा ।। ५०
स्थाणूनां छिन्नशाखानां मृन्मयानां च वासवः ।
संधत्ते पश्य दूराणां वातैर्मुक्तशिखा इव ।। ५१
एते कदम्बकुलकुन्दसुगन्धिवाता
लिम्पन्ति मांसलतया मकरन्दवृष्टेः ।

घ्राणं घनैः परिमलैरलिजालनीला

व्यालोड्य मेघपटलैः खमिवाभ्रकायाः ।।५३

उन्निद्रकुड्मलदलासु वनस्थलीषु

सच्छायशाद्वलघनेषु च जङ्गलेषु ।

ग्रामेषु संततफलद्रुमसंकुलेषु

लक्ष्मीः स्वयं निवसतीव निवासहेतोः ।। ५३

वातायनागतलतावृतसौधकोश-

कोशातकीकुसुमकेसरमाहरद्भिः ।

आगुल्फकीर्णमुकुलाजिर एष वातै-

ग्रामो विभाति नगरं वनदेवतानाम् ।। ५४

उन्निद्रामलचम्पकद्रुमलतादोलाविलोलाङ्गनाः

कूजन्निर्झरवारयः परिसरप्रोन्निद्रतालद्रुमाः उत्फुल्लोज्ज्वलमंजरीसितलतागेहोल्लसद्बर्हिणः

पर्यन्तोन्नतसाललम्बजलदा रम्या गिरिग्रामकाः

वातालोलविचित्रपत्रलतिकासंपूर्णनीलस्थलाः

कूजल्लावककोककुक्कुटघटागायत्पुलिन्दाङ्गनाः ।

बालाव्याकुलतर्णका दधिमधुक्षीराज्यपानोज्ज्वलाः

कस्येवामृतमण्डपा विरचिता रम्या गिरिग्रामकाः

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० अवि० वि० विपश्चिदनुकृतपदार्थवर्णनं नाम

पञ्चदशाधिकशततमः सर्गः ।।११५।।